No. १२३४ / क

Title महाकालकवचम्

Author

Extent ५ पत्र Age

Subject तन्त्र

महाकालकवचम्

नं॰ १३३४

नं. १८९

१८६

#5794

F-4

Complete

का॰ ले॰ क॰ १

ॐश्रीगणेशायनमः श्रीभैरवउवाच अथवक्ष्यामिदे
वेशिकवचमंत्रगर्भकं मूलमंत्रस्वरूपंचाविश्वमं
गलकाभिधं सर्वसंपत्प्रदंचैवमहाकालस्यपार्व
ति गुह्यातिगुह्यपरमंमूलविद्यामयंध्रुवं परमार्थ
प्रदंनित्यंभोगमोक्षैककारणं महाभयहरंदेविमहै
श्वर्यप्रदंशिवे कवचस्यास्यदेवेशिऋषिर्भैरवईरि
तः अनुष्टुप्छंदइत्युक्तं महाकालश्चदेवता कार्य

बीजंपराशक्तिस्तांकीलकमीरितं धर्मार्थकाममो
क्षार्थेविनियोगः प्रकीर्त्तितः अथध्यानं श्यामवर्णंम
हाकायंमहाकालंत्रिलोचनं नीलकंठंखनेजस्कंने
त्रत्रयविभूषितं खड्गचर्मधरंदेवंवरदाभयपाणि
कं शूलहस्तंचखट्वांगधारिणंमंत्रनायकं पिनाक
हस्तंदेवेशंनोमरंबिभ्रतंविभुं प्रासपट्टिसहस्तंवैभै
रवंतमहास्मरेत् एवंविधेनध्यानेनमनसाचिंतये

का॰
क॰
२

2

ह्रिंमे ॐ ह्रूं शिरः पातु मे कालं ललाटे ह्रीं सदा मम हूं
कारकं भ्रूदीशं मे बीजहृदयस्वरूपिणी ह्रीं पातु लोच
नद्वंद्वं मुखं ह्रीं बीजरूपिणी ह्रीकारकं कंठदेशो ह्रीं
पातु स्कंदयोर्मम महाकालः सदा पातु भुजो सव्ये
नरौ मम ह्रीकारं हृदयं पातु हूं मे व्याडदरं मम ह्रीं
नाभो पातु सनातनदेवी ह्रींकाररूपिणी ब्रव्यान्मे लिं
गदेशं च ह्रीं रत्नेहु त्यदेशाके हूर्चयुग्मं पातु पादौ-

स्वाहा पादतलं मम श्रीघोडशान्तः पातु सर्वांगे मम स
र्वदा श्रुतिर्वह्निश्मशां पातु देवदत्तश्च भैरवः भगलिंगा
मृतप्रीतः सर्वसंधिषु रक्षतु महोग्रो मां सदा प[illegible]उम
मेंद्रियसमूहकं शिवो मम मेंद्रियार्थेषु रक्षतु येद दक्षिणे
ऽपि महाकालः पश्चिमे व्याद्दक्षिणे देवदत्तकः भग
लिंगामृतं प्रीतो भगलिंगस्वरूपकः उदीच्यां मूर्धग
पातु पूर्वे संहारभैरवः दिगंबरः श्मशानस्थः पातु दि

का॰ क॰ ३

३

न्तु विदिक्षु च घोररावा हृहासो मे शिवो मे सर्वदावतु पा
तु विक्षेषु चौरेषु जगड्डपि रमन्नकः करालवदनोच्चोरः
प्रेतकोलाहलप्रियः मुक्तकेशः सकेशाश्च मदरोन्मत्त
भैरवः देवदत्तो महोयस्तु सदाश्मश्मशानगाः पुरः शिर
सः पादपर्यन्तं महाकालो वनात्सदा इतीदं कवचं दिव्यं
साधकानां सुदुर्लभं मंत्रसिद्धिकरं साक्षात् महाकाल
स्य भाषितं इदं कवचमज्ञात्वा यो जपेत् कालभैरवं श

तलक्षं प्रजप्तोपि तस्य मंत्रो न सिध्यति स शस्त्रघात
माप्नोति सोचिरान्मृत्युमाप्नुयात् मंत्रेण म्रियते यो
गी रक्षयेत्कवचं ततः त्रिसंध्यं पठनादस्य कवचस्य
तु पार्वती सिद्धयोष्टौ करे तस्य महेश इव चापरः रू
पेण स्मरतुल्यो ष्टौ कामिनीनां प्रियो भवेत् तस्मादेत
त्कवचं न देयं यस्य कस्यचित् भक्तियुक्ताय शांताय
दानशीलाय धीमते यो ददाति ह्यशिष्येभ्यो वश्ये पतनस्य

का· क· ध

जगद्भवेत् गुह्याद्गुह्यतरंगुह्यंमहाहृद्देणमाश्रितं रवौ
मूर्ज्ञेलिखेद्धर्मस्वयंभूः क्रमसमस्तजा ॐक्रमेताष्टगं
येनतन्त्रेननिजरेतसा धारयन् मूर्द्धिवाबाहोप्राप्नुया
त्परमांगतिं धनकामोलभेद्वित्तंपुत्रकामोलभेत्सु
ता रणेरिपून्वरोहत्वाकल्याणीगृहमाविशेत् यस्य
कंठगतंतस्यकरस्थाःसर्वसिद्धयः श्रीविश्वकवचंना
मकवचंनप्रकाशयेत् रहस्यातिरहस्यंचगोपनीयं

स्वयोनिवत् इतिश्रीरुद्रयामलेतंत्रे विश्वमंगल
नाममहाकालकवचंसंपूर्णं ॥